# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 1st Semester Supplementary Examination, 2021

## SANHGEC01T/SANGCOR01T-SANSKRIT (GE1/DSC1)

Time Allotted: 2 Hours Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. एषु पञ्चप्रश्नाः संस्कृतभाषया देवनागरीलिप्य च समाधेयाः – 2×5 = 10

(क) कालिदासमते कौ जगतः पितरौ ? काभ्याञ्च तुलितौ ?

(ख) कवेः अल्पविषया मतिः केन तुलिता ?

(ग) कस्य वंशस्य कीर्तनं विहितमस्मिन् काव्ये ? कथं चासीत् तेषां रथगतिः ?

(घ) कुत्र सुवर्णस्य विशुद्धेः परीक्षा भवति ? कथञ्च अस्योपमाया अवतारणा ?

(ङ) सूर्यपुत्रः कः ? किञ्च तस्य वैशिष्ट्यम् ?

(च) मनुवंशे कः प्रथमः नरपतिः ? क्षीरनिधौ किमिव प्रसूतः सः ?

(छ) रघुवंशस्य प्रख्यातटीकायाः टीकाकर्तुश्च नाम किम् ?

2. श्लोकस्यैकस्य व्याख्या रचनीया – 5×1 = 5

(क) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वती-परमेश्वरौ॥

(ख) वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव॥

### SECTION-B

3. एकः प्रश्नः समाधेयः – 10×1 = 10

(क) पार्वत्याः कठोरतपस्यायाः वर्णना करणीया।

(ख) तपस्यावर्णने कालिदासीयोपमाप्रयोगवैचित्र्यं प्रदर्शनीयम्।

4. द्वयोः श्लोकयोः व्याख्या करणीया – 5×2 = 10

(क) तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता॥

(ख) निशम्य चैनां तपसे कृतोद्यमां
सुतां गिरीशप्रतिशक्तमानसाम्।
उवाच मेना परिरभ्य वक्षसा
निवारयन्ती महतो सुनिव्रतात्॥

(ग) मनीषिताः सन्ति गृहेषु देवताः
तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः ॥

(घ) अथानुरूपाभिनिवेशतोषिणा
कृताभ्यनुज्ञा गुरुणा गरीयसा।
प्रजासु पश्चात्प्रथितं तदाख्यया
जगाम गौरीशिखरं शिखण्डिमत् ॥

## SECTION-C

5. एकः प्रश्नः समाधेयः – 10×1 = 10

(क) कथं न मूर्खजनचित्तमाराधयेत् तन्नीतिशतकम् आधारीकृत्य प्रतिपादनीयम्।

(ख) विद्यायां महत्त्वं प्रदर्श्यम्।

6. श्लोकस्यैकस्य व्याख्या रचनीया। 5×1 = 5

(क) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्निदग्धं ब्रह्मापि नरं न रञ्जयति॥

(ख) लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिवेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।
कदाचिदपि पर्यटञ्छशविषाणमासादयेत्
न तु प्रतिनिविष्टमुर्खजनचित्तमाराधयेत्॥

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within* 1 *hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——